२ तदुच्चके णोयुगखांगा द्राक्षुपे खशीतघुत पमदिष्टाः २१६०४।२।१०॥ १०४ गुरोः स्तु नीच मध्यवर्णोभ
वांगा द्वाः शरजाः खक्षता ११६११।१५।४० स्तथैव तदुच्च करणौऽब्धिपगाष्टनागा चेद्द्राः खरामाः स्वध
तिः १८८४४।३०।२१ मदिष्टा १०५ शने स्तु नीच मध्यवर्णो स्य पंचगजाष्ट वेद्द्राः शरखापवश्च १८८५५।
५५ तत्तुंगजो द्विद्विगुणौ गद्द्वानागेषवः पचगुणाः मदिष्टाः २६३२२।५८।३५ ॥१०६ मनीचक
र्णो रसांगाद्रामाम्नष्टाग्नपो गोनिगमाः २६३२८।३८।४८ मदिष्टाः तत्तुंगनम्नखा ब्धिगुणगांगद्द
स्त्राः पंचाब्धयः स्तमताता ३६३४०।४५।४७ मदिष्टाः १०७ एते ग्रहाणां कथितोच्चकर्णास्तथैवनी
चाभिधाः कर्णकाश्च विवार्द्धमानेन पतोनितात्तपरो स्वनीचमध्यवर्णा भवंति १०८ खंसमचेद्द्युमन
वो।०।२७।२४ हिमांशोर्व्यासार्द्धमानं किलरोमकोक्तं संद्रवकौ वेदयुगा ०२।३४ बुधस्य खमाकृतिः स

९७

मगुणाः०२२।३० मितम् १०८ रवेर्मासाः पक्षशराः शराक्षा ... परा ... भूतोक्षिनः पिः मिताः कुजस्य
१।२८।२।२५।। गुरोः शरेषवेदाक्षोत्ताद्रि पंच ५।४४।२ शनेः शराः खांबुधयो बाणा ज्ञाः ५।४०।२५।।११०
खशून्यखांगाग्नमितैश्च योजनैर्भगोलमानं कथितं तुरैः मके खभेभमितो वेदमितं तु नक्षत्रक्ष्या
सप्रमाणं गणितोयपक्रम १११ खखखांगवेदप्रमितैश्च योजनैर्भूव्यासमानं गदितं पुलोमैः रश्मा
हतात्तत्क्षितिः परं स्यात् भूवृत्तमानं किल सप्रमाणं ११२ लंबज्यकाघ्नं त्रिमजीवया प्तं भवेत्स्फु
टो परिधिश्च तेन देशांतरघ्नो खचरस्य भुक्तिर्विभाजिता पलिकादिलब्धं ११३ देशांतरं त्वे स्वऋ
णां ग्रहे स्याद्धरवापरे स्यात्स रपूर्वभागे क्षोणि वा मात्किलमेरलयं सूत्रं भवेन्मध्यमरेखिकाया गम०
११४ उन्मीलनाच्च शशिनो गणितागतरिमाग्ग्रहतुल्यता स्वनिलयं भवति प्रतीच्याम प्राच्याम ८
तीत्य गणितागतमेव मत्र संमीलनादपि तदंतरनाडिकाः स्यु स्तयाभिहतः स्वपरिधिः ख

रमैर्विभक्तो रेशांतरं भवति तत्किल योजनाद्यम् वारप्रवृत्तिरधिके भवति क्षपार्द्धे प्राक् न्यूनके तु परके
नरनाडिकाभिः २१६ मेषादितः क्षितिजस्थभजासवो ये स्युः सार्कतो मध्यखे नकलाख्य तदन्तरघ्नो द्युनिशा
सुभक्ता गतिर्यदाप्तं कालिकादिकं च २१७ कलागणात् प्राग्गुणिते धिको लक्ष्य लोधनं दोस्स्यांतरात्स्मे
तत्संस्कृता मध्यखगा निरक्षे स्पष्टा भवेयुर्भूपने भास्करोक्तिः २१८ अथ गोलबंधप्रकारमाह अथ
गोलं प्रवक्ष्यामि दृष्टान्ताय मुमुक्षवे यस्य विज्ञानतो वेत्ति सम्यग्गणितवासनां २१९ ताम्रवंशा
दिवृत्तैश्च खगोलं स्थितिदेशजम् बध्वा स्थिरं तदन्तस्थं भगोलं कारयेच्चलम् २२० पूर्वापरं च या
दवृत्ते एवं क्षितिपं तथा एतद्योगोनिजोर्ध्वाधः संस्थितौ स्वस्तिकाभिधौ २२१ स्वस्तिकाद्धन्व
त्ययोर्वृत्तं सवाह्यं निजं भवेत् तद्याम्यसौम्ययोगो हि गदितो समसंज्ञको २२२ ध्रुवविद्धं तनोः क्षांशैरू
र्ध्वे सौम्ये तु याम्याधः तच्चिह्नं कीलकप्रोतो काष्ठैस्ताधारसंस्थितौ २२३ एवं दृढं खगोलं तु कृत्वा पा

स्योत्तरे ध्रुवात् पलप्रमांशेष्वभवेत्तथा चिह्नकं स्वपोः २४ अक्षकीलावुभौ दैर्घ्योत्तरांतर्निःसृतौ दृढौ त-
98 योः प्रोतं मगोलस्य याम्योदगायनाभिधम् २५ तत्कीलकेन्द्रात्वांशैस्तु चक्रांतं द्विवृत्ताभिधम् ततो ध्रु-
वान्तरहवतानि कुर्यात् द्युमांशकैर्बुधः २६ अक्षकीलकमातं गोलेऽन्तः शरद्वृत्तकम् क्रांत्यर्थं ध्रुवकतेषु
ध्रुवकीलात ततबहिः २७ अथ नक्षत्रवृत्तं तु पद्धतं खांकभागकैः क्रांतिवृत्तं तथैव स्यात् स्वमाभिधमं-
ले २८ गोलसंधौ तु संपातौ विषुवत्क्रांतिवृत्तयोः वलांशा शाम्यायलितौ प्राक् पश्चात्स्वतत्क्तदाः १
२९ कदंबभ्रमवृत्तं च भगोलध्रुवचिह्नतः कुर्यात्तथायमांश्च गोलतत्वविशारदः ३० मध्येऽर्केविभा-
गाश्च मलाद्दश राशयः अंकनीयास्तथा भानि समभागानि चक्रमात् ३१ इति गोलबंधः अथ राम०
नक्रांतिवृत्तं च कदंबभ्रममेव च याम्योत्तरं च विज्ञेयं वेधार्थं तत्र पंचकम् ३२ अथैषां क्रमेणादौ ९८
का अथ ग्रासादिबिंबानि याप्ति क्रममित्यादि आवधो द्विगममित्यन्तं श्लोकाः सुगमाः ततः परमनवः

स्वारोचिषादयो गताः वर्त्तमानस्यैव वैवस्वतमनोः सप्तविंशतियुगानि यातानि वर्त्तमानस्याष्टाविंशति
तमयुगस्य कृतत्रेताद्वापरयुगात्मकं संध्यित्रयं यातम् शालिवाहनशाकादौ कलेर्गतवर्षाणि नंद
द्रिदसुगुणा ३१७९ मितानि एषां योगः वर्त्तमानानां सप्तसंधिवर्षैः सप्तगुणितकृतवर्षसमैर्युतः जा
तः शकात्तवर्षगणः १९७२९४७१७९ अपमैतैः सृष्टिवर्षैः १७०६४००० हीनः जातोत्पत्तिकालाब्ध
काद्यपर्यन्तं वर्षगणः १९५५८८३१७९ यतः ब्रह्मदिनादारभ्य एतैः सृष्टिवर्षैः सर्वग्रहपातमंदो
च्चादीनां मेषादौ योगो जातः अथ च भचक्रं षष्टिघटीभिः प्रत्यगामामेकं परिवर्त्तं करोति ग्रहास्तु
स्वल्पगत्या स्वस्वगत्या प्राक् चलन्ति अतो भूपृष्ठस्थानां पूर्वोदयः पश्चिमास्तश्च प्रत्यहं भवति ग्रहा
णां कक्षामेदेन कलागतिस्तु भिन्ना भिन्नास्ति योजनगतिस्तु सर्वेषां पादोनगोस्वधृति भूमिता सर्वे
षां समास्ति कस्मिन् काले सर्वेषां पत्तिर्जातास्त्यपेक्षायामाह लंकानिशीथे इति लंकार्द्धरात्रे वे

त्रैमितमतिपातैश्चाणामपनात्सैग्रहमंदोच्चपातानांहीनांमेषादौयोगोजातः पुनस्तादृशोयोगोयेनका
99 लेनभवतिसकालःकल्पसंज्ञः तद्वर्षाणिकोटिगुणितारसाब्धयःभवंति तस्मिन्कालेग्रहाणां
मंदोच्चादीनांचकियंतोभगणाभवंतीत्यपेक्षायामाह कल्पेऽर्केत्र्यक्षेन्दुनेत्यादिभिरेकादशश्लोकैः
एतेश्लोकाःसुगमार्थाः अत्रोपपत्तिस्तु एतावतिकालेएतावत्प्रमाणाभगणाभवंतीत्यागमप्रमा
णेनैव अत्रभास्कराचार्यैःस्फुटग्रहमध्यखगप्रकल्प्येत्यादिनोपपत्तिरुक्तास्ति तत्र मंदजन
प्रतारणामात्रमेवयतस्तेनमंदोच्चंपरमंदफलंपरमशीघ्रफलंचागमप्रमाणेनैवानीतं अ
र्द्धज्यातीयन्यायःसमीचीनोनभवति अत्रास्माभिःपरममंदफलानिपरमशीघ्रफलानिमंदो राम०
च्चानिमध्यमाश्चवेधेनैवनिश्चितानि तस्यैववक्ष्यामः अथकल्पेभावनात्मकाभगणान्वांपूर्वसा ९९
नरविमासांश्च अधिमासानवमास्ववासांश्चमयोक्त्वहितयमध्येत्यादिश्लोकैराह एतेश्लोकाः

सुगमार्थाः भानाम्प्रेत्तिमानां मासाः षड्गुणो विवर्जिता तत्स्म कुदिनानि भवंति रविन्दुभगणांतरं चंद्र
मासा भवंति सूर्यमासशशिमासांतरं अधिमासा भवंति सावनचांद्रदिनांतरं अवमदिनानि भव
तीति भगणाध्यायः अथाहर्गणानयनमाह स्पष्टे गतो वर्षे गणाइत्यादिना स्पष्टे गते वर्षे गणेः द्वा
दशगुणिते चैत्रादिगतमासैर्युतः कार्यः पुनर्द्विधा स्थाप्याः ततो स्मादधिमासगुणिताद्रविमा
सभक्ताल्लब्धाधिमासैस्त्रिंशद्गुणितैः पृथक्स्थो युक्तः कार्यः अपंचांद्रदिनगणो भवति अयमपि
पृथक्स्थाप्यः अस्मात्कल्पावमगुणितात्कल्पचांद्रभक्ताल्लब्धावमैः पृथक्स्थो रहितः कार्यः
स लंकानिशीथेऽर्हगणो भवति अयं सप्ततष्टशेषं रवेर्वारः गतः स्यात् अत्रोपपत्तिः गतवर्ष
गणो रविनिघ्नो द्वादशघ्नो वा होगातरविमासगणो भवति चैत्रादिचांद्रगतमासतुल्ये रविमासैर
पंपनेश्च कृतसंक्रांतिपर्यंतं रविमासगणो भवति अथ त्रिंशद्गुणितः गतसंक्रांतिकाली

100

नः सौरदिनगणो भवति तस्य चांद्रदिनीकरणार्थं माधिमासानयनं कार्यं तत्तद्यथा कल्पसौरैः कल्पाधिमा
सा लभ्यंते तदेष्टसौरैः किमिति अनुपातेन लब्धं केवलाधिमासैस्त्रिंशद्गुणितैर्युक्तः सौरगणः अ
मांतचांद्रगणो भवति कुतः अमांतसंक्रांतिकालपर्यन्तं अधिमासशेषं भवति सावयवाधिमा
सा त्रिंशद्गुणिता तत्र सौराहर्गणे योज्यंते तत्तत्संक्रांतिकालीनचांद्राहर्गणो भवति गणितसौक
र्यार्थमपेक्षितो मांतकालीनो तो लाघवार्थं निरवयवा एवाधिमासास्त्रिंशद्गुणिताः सौरदिनेषु
योजिताः पुनस्तत्र गततिथयो योज्याः इदं मुख्यमेव अपवादं रूपगतान्तिथ्यंते भवति न तु पूर्व
मेव गततिथयो योजिताः जिनकिंचिदधिमासशेषेनन्तरं यातिष्यति सत्यं अधिमासशेषस्य प्रयो राम०
जनाभावान्न किंचिदहर्गणांतरं यातिष्यति अथवा हहर्गणस्य सावनाहर्गणकरणार्थं अ १००
वमानयनं तद्यथा कल्पचांद्रैः कल्पावमानि लभ्यंते तदेष्टचांद्रैः किमिति लब्धावमैस्तैरहि

तश्चांद्रोऽहर्गणः लंकार्द्धरात्रेऽहर्गणोभवतियमकोटिसूर्योदयेच अत्राप्यवमशेषंस्यात् यतस्त्रिंशत्त
सूर्योदयमध्यमसैवावमशेषंभवति सावयवावमशेषोधनेतिथ्यंतेऽहर्गणोभवति अयंस्थितस्तुल्य
दयेतोऽवमशेषंत्यक्तम् अथ्याधिमासावमशेषाभ्यांफलंकुतोनगृहीतंतस्याशंकायामाह संक्रां
तिकालेति सुगमंगतार्थंच तदुक्तंभास्कराचार्यैः द्विविधः संक्रमकालतःप्राक्ससैवतिथ्यंत्यधिमा
सशेषंतिथ्यंतसूर्योदययोस्तुमध्यमसैवातिथ्यन्यवमावशेषमिति अथयत्किंचिदुद्दिष्टेस्फुटेऽधिकर
तियदास्यष्टाधिमासोनलब्धः गणितेनलब्धःतदानिरेकानधिमासोलब्धःगणितागतोनलब्धःत
दासैकानधिमासान्कृत्वाऽहर्गणंसाधयेत् समतद्गणेचक्रतेनापातितदासैकंनिरेकंवाऽहर्गणंकृ
त्वाग्रहान्साधयेत् अथमध्यमानयनमाह अहर्गणःस्वैर्भगणैर्हतेति अहर्गणःस्वैःस्वै
कल्पभगणैर्गुणितःकल्पकुदिनैर्भक्तःभगणादिकोमध्यमग्रहःस्यात् अथलंकानिशीथे

पमकोटिसंख्योदयसिद्धपरमध्याह्नमध्यमो भवति अत्रोपपत्तिस्त्रैराशिकेन कल्पकुदिनैः कल्पखस
भगणा लभ्यंते तदेष्टकुदिनैः किमिति अत्र सर्वत्र त्रैराशिकं नाम निष्पत्तिः कल्पकुदिनानां कल्पभग
101 णानां च यानि व्यन्तिरह्नि सैवेष्टकुदिनानां मिष्टभगणानां चास्ति अत्रेष्टभगणा अज्ञाताः संति
क | क॰कुदि | क॰भग | अत्र क्षितिपतृतीयपदो कल्पभगणेष्टकुदिनयोर्घातः प्रथमेन कल्पकुदिनैर्भक्तः
च | इ॰कुदि | इष्टभग | तदेष्टभगणा भवंति एवं सर्वत्र त्रैराशिकोपपत्तिरूह्नीया अथ खादीनां
कलाद्यां गतिमाह गोक्षाभ्यस्याष्टाविन्यादिना सुगमार्थाः अथ वर्षादिध्रुवकानाह कल्पान्ते स्यादिना क
ल्पीयमेरदिनवांद्रदिनघावनाहिनानि तथाधिमासावमादिनानि तथा ग्रहचक्राणि कल्पसौरवर्षैर्भ राम०
क्तान्येकवर्षीयानि भवंति एतान्यभीष्टवर्षैर्गुणितानि अभीष्टवर्षादौ भवंति तत्र सावनदिनानि १०१
सप्ततष्टानि दिनादिको वाराधोऽब्दपो भवति यदि वर्षारंभादहर्गणः क्रतस्तदैवस्य प्राग्नि भवारा

ङ्गणानां कार्या अथवर्षादितोग्रहानयनमाह वर्षादितइति वर्षादितोभीष्टतिथिपर्यंततिथयो विग

णाप्यग्राह्याः षष्टिभिमासमध्येत्रस्थापितिथयोग्राह्याः नाःस्वचतुष्षष्ट्यंशहीनाहर्गणाःस्यात् अ

हर्गणाः सप्ततष्टोऽब्दपाद्यमवारादावारःस्यात्पष्टिवारोन मिलाति न हर्गणःसैकोनिरेकोवाकार्यः अ

र्याहर्गणोन स्वस्वगतिगुणानीपायपद्धश्पादिफलंभवेत्न दृष्टीरमध्युवैःयुक्तंमध्यमग्रहोभवति इतिमध्य

मग्रहानयनम् रविविद्येतिशुरोपांतमगणाः द्वादशगुणाः षष्टितष्टाःविजयाद्या संवत्सराभवं

तिपतः सृष्ट्यादौविजयसंवत्सरश्चासीत्चांद्रसंवत्सरस्तुकल्यादौप्रमाथीत्यासीत् कलियु

गादावपिगुरुमानेनविजयसंवत्सरश्चांद्रमानेनप्रमाथीसंवत्सरश्चासीत्तस्मात्कलिगतवर्षाणि

षष्टितष्टानिप्रमाथीतोचांद्रसंवत्सरःस्यात् सार्द्धं षष्टिवर्षैर्गुरु संवत्सरमानचमानसंवत्सरा

न्तरं एकाधिकंभवति यथाकलियुगादौप्रमाथीसंवत्सरविजयसंवत्सरयोरन्तरंचतुर्दशमितमा

सीत् ततः साङ्घ्रीष्टषष्टिवर्षैः पंचदशमितांतरं जातम् एवं च षष्टिमितमंतरं मूलात्पुनरेकाद्यमंतरं भवति अ
धुनावर्त्तमानशके १६५२ अनुमानेन साधारणसंवत्सरोस्ति गुरुमानेन दुर्मतिसंवत्सरः अनयोरंतरं दश
मितमस्ति अथ चैकादशमितं भविष्यति इति सुद्धिः मिश्रेपि यस्मिन् चांद्रमासे रविसंक्रमो भवति स मासः
102 शुद्धश्चैत्रादिसंज्ञो भवति अथाधिकमासावममासयोर्लक्षणमाह संक्रांतिहीन इति संक्रांतिहीनो मास
अधिकसंज्ञो भवति संक्रांतिद्वयं यस्मिन् भवति स न्यूनमाससंज्ञो भवति अयं न्यूनमासः सुकदाचि
द्भवति तत्रापि कार्त्तिकादिमासचतुष्टय एव भवति नान्यत्र तस्मिन् वर्षेऽधिमासद्वयं भवति अथ स
कक्षामाह वेदर्त्तुनागाभ्रे त्यादिना मृगमार्थे इयं खकक्षा ग्रहाणां मार्गेण मंदकामध्यमा खखकक्षा राम०
भवति उष्णुक्रयोस्तु शीघ्रोच्चकक्षैव कक्षा भवति तत्र तयो मंदमार्गे खविगत्या भवति अथ नक्षत्रा १०२
णां ग्रहाणां च मध्यकक्षा स्फुटीश्चैवं दृक्कक्षाक्रमेणाह खखाभ्रवेदाष्टिगुणेति मृगमार्थानि पूर्वं

चंद्रस्य ततो बुधस्य ततः शुक्रस्य ततो रवेः ततः कुजस्य ततो गुरोः ततः शनेः ततः सर्वोपरिष्टान्नक्षत्र
कक्षार्ककक्षा च द्विगुणिता भकक्षा भवति ऊर्ध्वस्थितस्येति ऊर्ध्वस्थितस्य स्वल्पा भवति तस्मान्महद्वृत्त
स्थो ग्रहः भगणभोगं महता कालेन करोति यथा शनिस्त्रिंशद्वर्षैर्भगणभोगं करोति स्वल्पवृत्तस्थो ग्रहः
स्वल्पेन कालेन भगणभोगं करोति यथा चंद्रो मासैकेन भगणभोगं करोति अथ मध्यकरणेनाह र
वेर्मध्यकरणे करहलेत्यादिना श्लोकाः सुगमार्थाः अथ स्पष्टयोजनात्मकानि बिंबान्याह खखेष
नेत्र इति सुगमार्थं अथ चंद्रकोणे भौमादिकानां बिंबानयनमाह भौमादिकानां कलेति चंद्रगो
लेऽप्यानीतं भौमादिकानां बिंबमानं पंचदशभक्तं कलामानं भवति यतस्तत्र पंचदशयोजनैरेका क
ला भवति अथ स्पष्टकक्षानयनमाह त्रिज्यापलश्रवणेति त्रिज्याशीघ्रकर्णयोर्गाई स्पष्टकर्णे
भवति मध्यकक्षा स्पष्टकर्णगुणा त्रिज्याभक्ता फलं स्पष्टकक्षा भवति अस्योपपत्तिः शीघ्रकर्णेनैव

स्पष्टकक्षात्मानीतास्तिमासमीचीनाभवति यतस्तत्रकक्षानांसांकर्यभवति अथभौमादिकानांस्पष्टविं
बानयनमाह त्रिज्याग्रंगा विंबकलेति विंबकलास्त्रिज्यागुणाः स्पष्टकर्णभक्ताः स्फुटविंबमानंभवति
तदुक्तं विष्णुधर्मोत्तरे शाकल्येन त्रिचतुःकर्णयोगार्द्धे स्फुटकर्णः स्यपुस्तकेयरहःसंचरतीति अथ
103 चंद्रग्रहाणांपरमनीचोच्चकर्णानाह चंद्रस्यनीचश्रवणइत्यादिनाश्लोकाःसुगमार्थाः अथभौमा
दिकानांयोजनात्मकाः शीघ्रांत्यफलज्याकाआह भौमस्यशीघ्रांत्यफलज्येत्यादिना श्लोकाःसुगमार्थाः
अथसूर्यचंद्रयोर्योजनात्मकेमांद्यांत्यफलज्येआह रवेर्मंद्येत्यंशागायमा इति सुगमार्थं अथपव
नाचार्यमतेनचंद्रग्रहनीचोच्चकर्णानाहः रवेर्भवइति भूकर्णेस्वरूपमितंमानंग्रहकक्ष्यतन्मानेन ग्रम०
येनीचोच्चकर्णाभवंतितान्तत्प्रमाणेनविंबमानेचवदामि चंद्रस्यनीच्चश्रवणइत्यादिभिःश्लो १०३
काःसुगमार्थाः अत्रोपपत्तिः सर्वकक्षाणांमध्यपरिधयपापोगित्वात्संदेहमपरिधयपपत्तिरस्मातेय

गिरस्तस्मांद्देक्षम्याथ यांचीमितैः पर्वतः पर्यलीवत्सगुल्मं पुरीचोज्जयिन्याख्याग्गरटकारस्तेत्रमेरु

र्वोमध्येरेखा एते घम्यत मेरे रेखानगरे यामोत्तरभित्तियंत्रेणावेधेनांशानिश्चयः कार्यः पुनस्ततउत्तरतः पं

चाशतिक्रोशाधिकान्तरे रेखानगरे एवं तैनैव यंत्रेणांशानिश्चयः कार्यः अनयोरंतरं कार्यं मत्वाणान्तर

योजनानि मापयेत्तापानि अंशांतरेण भाज्यानि फलं भूपरिधिर्भवति पुनरस्मात्त्ववाणास्यैः

१२५० हेतावन्तं षष्टि ३९६७ मितात्वद्र्भव्यासो भवति भूपरिधिस्तु पर्वतैः भ्रहूसहस्त्रं मितोनि

श्चितोस्ति अथ पर्वतैर्भकर्णो योजनवाहुल्यादूपमितमेवमानं कल्पितं तेन मानेन कक्षाः कर्णो

श्चानेयाः अन्यातुकक्षाणां प्रयोजनाभावात्कर्णा सवलिखिताः कक्षास्तु ते रूपख्येयारसंल

माएवकल्पिताः अथ योगीमास्यां याम्योत्तरभित्तियंत्रेण याम्योत्तरवृत्तस्यस्य वंद्रस्यवेधे

ननतांशाः मात्याः पुनर्गतितेन च बाधाः अनयोरंतरं हग्लवनं भवति अस्य ज्याकार्याः पुनर्वेधे

ननतोंशज्यातस्य गुणात्फलं वनत्याभक्तात्लब्धयोजनात्मकः चरोभवति पुनरपंपरममंदकर्णेन ६५।११

गुणयः स्पष्टमंदकर्णेन भाज्यः फलं परमोच्चकर्णो भवति स चापं ६३।३५।२५ पुनर्वेधसिद्धः कर्णः परम

104 नीचकर्णेनानेन ३५।७ गुणितश्चेधकालिके स्पष्टमंदकर्णेन भक्तः फलं परमनीचकर्णो भवति एतदंत

रमितावेधकक्ष्यापाः प्रष्टताः सन्ति वेधपातो ऽच्चकर्णस्तु ६७।२० एतावन्मितोस्ति अथ बुधविंवार्द्धेनानेन

नः ।२।३४ युतः ६।१२।४४ अथ बुधस्य परमनीचकर्णो भवति अथ परमोच्चकर्णगुणः परमनीच

कर्णो भक्तः योजनात्मकः परमोच्चकर्णो भवति २२६।२८।३६ अथ शुक्रविंवार्द्धेनानेन ०।२२।३२ युतः

२२६।५१।०२ किंचिदंतरं कक्ष्यापारे योऽस्ति तं तेन किंचिदधिको लिखितः २२६।४४।५० अथ शुक्रनी ग्र०

चकर्णः पुनरस्मात्स्तु पातेन शुक्रोच्चकर्णः साध्यः पुनरपि शुक्रोच्चकर्णः सूर्यविंवार्द्धेनानेन ।६।५३ यु १०४

तो यातस्सूर्यनीचकर्णः पुनरस्तु पतनसूर्योच्चकर्णः साध्यः अथ भौमविंवार्द्धेन युतो जातो भौम

नीचकरणैः पुनरस्मात्सौमोच्चकरणैः साध्यः अपगुरुबिंबार्द्धयुतो जातो गुरुनीचकरणैः पुनरस्माद्गुरूच्चकरणैः
साध्यः अपशनिबिंबार्द्धयुतो जातः शनिनीचकरणैः पुनरस्माच्छनैश्चरोच्चकरणैः साध्यः पुनरयं प्रमाणमान
स्पष्टबिंबार्द्धयुतो जातो भकरणैः तैरेवमुपपन्नं यथोक्तं अथ बिंबार्द्धमानान्याह खंसप्तचंद्रात्पाहिना
श्लोकाः सुगमार्थाः अथ भूपरिधिमानमाह खभूम्यरवा इति सुगमार्थं अत्र रविणा षोडशश
त १६०० परिमितः भूव्यासउक्तः तत्परिधिस्तु व्यासवर्गो दशगुणान्मूलं भूपरिधिः स्फुटः अनेन प्रका
रेण स्थूलं भूपरिधिमानमुक्तं इह तत्त्वविवेककारेण कमलाकरज्योतिर्विदा सूक्ष्मत्वेनांगीकृतं यस्तु सर्वे
त्रव्यासात्परिध्यानयने अयं प्रकारः स्वीकृतः स्वग्रंथेन उक्तमपि रूपमिते व्यासे दशामूलमितः परिधि
रिति अन्यच्च व्यासे भनंदाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्म इत्यस्मिन्नर्वाचीनसूक्ष्मप
कारे भास्कराचार्योक्ते दूषणमपि दत्तं तस्यैः सम्राट्श्रीराजाधिराजजयसिंहदेवैः सर्वार्जपप्रकेस्व

कृतप्रत्यथालापाशिल्पिभिः स्पष्टं ज्ञातो गोलीति विज्ञिस्त्य समेत्य निश्चयः कृतः तेन व्यासेमनं स्वस्विरते विभक्तो
रवेर्वाण सौर्ये परिधिस्तु सस्पष्टः स्पष्टभास्कराचार्योक्तः प्रकारः समीचीन इति सिद्धम् अथ सौरोक्तं भव्या
समाह खखाग्नवेदैरिति सुगमार्थं अथ स्पष्टभूपरिधिनानयने देशांतरं चाह लंकान्यकाक्षमिति भूपरिधिमा
105 नेलंबज्यया गुणपत्त्रिज्यया भाज्यं स्वदेशे स्पष्टपरिधिर्भवति ग्रहभुक्तिर्देशांतरेण गुणापास्पष्टपरिधिना
भाज्यापलं कलात्मकं देशांतरं भवति तद्ग्रहे स्वकार्ये स्वदेशे रेखादेशात्पश्चिमस्थे सति पूर्वस्थे क्षणंका
र्ये अथ रेखामाह राक्षसानिवासादिति लंकातो मेरुपर्यंतं सन्ने सन्ने मध्ये रेखा भवति अथ स्वदेशः पूर्व
तो वा पश्चिमतो स्तीति ज्ञानाय पायमाह उन्मीलनाच्च शशिन इति यदा रेखाग्रासो भवति तदा स्वदे राम०
शे देशांतरफल साधनं विना गणितं कृत्वोन्मीलनकालः साध्यः यद्युन्मीलनं गणितागतकालात्पूर्वं १०५
भवति तदा स्वदेशो रेखातः पश्चिमस्यामस्ति यद्युन्मीलनं गणितागतकालानंतरं भवति तदा रेखा

मेदेशात्स्वदेशः पूर्वतोऽस्तीति ज्ञेयं गतागतात् तत्काललब्धकालयोरंतरं घधाघुं देशांतरं भवति इदं स्पष्टमुपरि
धिनाऽऽगण्यं बुद्ध्याभ्यामं देशांतरं योजनानि भवति अथ वारप्रवृत्तिमाह वारप्रवृत्तिरितिमाद्देशे स्व
निरक्षदेशांतरपले मेनेवारप्रवृत्तिर्भवति पश्चाद्देशे स्वनिशार्द्धे देशांतरपलैरधिके वारप्रवृत्तिर्भव
ति अथ देशांतरमुना तस्यानयनमाह मेषादि निरक्षे रतिस्पष्टार्कतो निरक्षासवो ग्राह्याः मध्यार्के
स्वकलाग्राह्याः अनयोरंतरं स्वदेशाद्युगणनीयं अहोरात्रासुभिर्भाज्यं फलं कलाद्यं ग्रहे संस्कार्य
म् यदि मध्यार्ककला असुभ्योऽधिका भवंति तदा ऋणं कार्यं न्यूना चेत्तदा धनं कार्यं इत्युक्तप्रकारे
ण फलं नयसंस्कृतो ग्रहः स्वक्षितिजे रविबिंबे सति भवति इति मध्यमाधिकारस्य टीका अथ गो
लबंधमाह गोलबंधं प्रवक्ष्यामि तत्पादिभिश्चतुर्दश श्लोकैः श्लोकानुगमार्थाः राजाधिराजप्र
भृतोऽपरणार्थं संभाज्ञान्नात्मकातेसुशिल्पेसिद्धांतसंम्राजि महागाभीरमध्यक्रियाध्यायस्मात्

106

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३१	३२
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३०	३२
२	५	८	११	१३	१६	१८	२१	२३	२५	२६	२८	२९	३०	३१	३२	३२	३२	२२	३२	३०	२८	२६	२४	२१	१८	१४	१०	५	०	४४	४७
४६	३८		०		२८	४३	१				२८				१७	३२	२३	२०	१६	७	३५	२२	१५	२५	८	२१	५	१८	०	८	४२
५३	१०	२४	२३	४४	८	४८	२३	९	८	५४	५५	४९	५५	४४	५०	७	५०	४३	२२	२९	२	५५	६	३२	१०	५६	५२	५२	०	१३	३३
५५	२९	४४	५४	३८	४३	४१	२३	५०	२३	४४	३१	२५	७	५४	८	१९	१५	१७	२३	३८	२९	२६	४६	४०	४	४३	२२	४१		२७	४०
		०		२९				४०		३५		५०	५६	४९																	
१	१	१	१	१	१	१	१	१	१	१	१	१	१	१	१	०	०	०	१	०	०	०	०	०	०	०	०	०		०	०
२	२	२	२	२	१	२	२	१	१	२	२	२	०	०	०	५८	५९	५९	५८	५८	५७	५७	५७	५६	५६	५५	५५	५४		५३	५३
४०	५१	४३	३८	३३	२५	१८	८	५८	४२	३६	२२	६	४२	३३	२५	४४	३५	१४	४८	२८	५२	४८	१०	४३	१३	४४	१३	४२		३६	०
३३	३४	३५	३६	३७	३८	३९	४०	४१	४२	४३	४४	४५	४६	४७	४८	४९	५०	५१	५२	५३	५४	५५	५६	५७	५८	५९	६०	६१	६२	६३	६४
३४	३३	३४	३५	३६	३६	३७	३९	४०	४०	४१	४२	४३	४३	४४	४५	४५	४६	४७	४७	४८	४९	४९	५०	५०	५१	५१	५२	५२	५३	५३	
४०	३३	२४	१६	६	५६	४५	३४	८	५५	४०	२५	९	५२	३५	१६	५७	३७	५५	१६	३८	०	४४	१६	५२	२५	५७	२८	५८	२७	५२	
४८	५	५२	१	३	२२	३३	२	५२	११	४६	३५	३७	५२	२८	५७	४५	४३	५	५०	२२	४८	३२	१२	५८	४६	५७	२७	३८	३७	१६	
१	४०	३०	३६	२	५२	१६	७	२२	३८	२२	३	२३	२३	१६	१६	३४	३०	१६	१९	४०	५०	६	५०	२३	८	२६	५२	५०	२४	३०	
५४	२	३७	५२	४२	४३	१६	३५	४०	४५	२२	४३	४९	५८	४६	२	१८	४८	१३	२३	२४	३०	५६	३४	२०	१३	२४	२४	४८	३३	१०	
०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	१				
५२	५२	५०	५०	४८	४८	४८	४७	४७	४६	४५	४४	४४	४३	४२	४१	४०	३९	३९	३८	३७	३६	३५	३४	३३	३२	३१					
२३	४०	५९	३१	५०	११	२२	४६	४	१९	३४	४८	२	१५	३६	४	१९	४८	५८	४०	५४	२२	२४	३६	४२	३६	५०	५२				

५८

ग्रामु०
१०६

स्समाभिरतिमध्यमाधिकारः सटीकः सोपपत्तिकः संपूर्णः ॥ अथ स्पष्टाधिकार आरभ्यते तत्रादौ सर्वोपयोगित्वात्
शीघ्रपत्यंशजीवाकोष्टकालिख्यन्ते ॥ अथ ज्याकोष्टकेभ्यो जीवानयनं ज्याकाभुजांशप्रमकोष्टकाधोहस्थस्य
तेरैष्यांतरकेन निघ्नं कलादिकं षष्टिविभाजितं वयलेन प्रमाभुजासिंजिनी स्यात् १ ज्ञातज्याका पाः प्रविशोध्य जीवांश
पविनिघ्नं खरसैर्हृतं च यातैष्यजीवांतरकेन लब्धविशुद्धजीवाक्रुपेन यनुः स्यात् २ सुगमार्थं पद्य ॥ अथ मंदपरिधी
नाह रवेर्मन्दोच्चाद्यत्र स्वभागाः पपाधो रसैरविनायमस्ताः ३२ शराब्धाः २५ खरामाः ३० सुराः ३३ भास्कराः
१२ अनयोभौधपो ४८ प्रमकान्तकुजादेः ३ सुगमार्थं अत्र प्रामां तके खाब्धिलिप्ताविहिनाः रवेः शीतरश्मेश्च
पूर्वैर्निरुक्ताः रागाब्धा ७३ आजाश्चा ५८ रुद्राः २२ भरवः ११ अगजा भौधपो ४८ सुरभागाः कुजादेः ४ सुगमार्थं पद्य
अथ शीघ्रपरिधीनाह प्रमांतके शीघ्रपरिध्यंकाशा अर्थाप्तिरत्नाग्गुणाराम चंद्राः १३३ खाब्धाहि चन्द्रो २४०
धस्रमिता अनराग्रयः स्युः क्षितिजादिकानाम् ५ सुगमार्थं पद्यम् ॥ अथ गमकोते चलरत्तभागा माग्विर
त्नाघवरामः १३२ चंद्राः खाब्धाः खपक्षो चका २६० त्तचैव वेदो भौधपा ४० भूमिता ससिहृताः ६ सुगमार्थंप

[illegible]

राम: २००

107

६५	६६	६७	६८	६९	७०	७१	७२	७३	७४	७५	७६	७७	७८	७९	८०	८१	८२	८३	८४	८५	८६	८७	८८	८९	९०
५४	५४	५५	५५	५६	५६	५६	५७	५७	५७	५७	५८	५८	५८	५८	५८	५८	५९	५८	५९	५९	५९	५९	५९	५९	६०
२२	४०	१३	३०	०	२२	४३	३	२२	४०	४७	१३	२७	४१	५३	५	१५	२४	३३	४०	४८	५१	५५	५७	५९	०
४२	४१	४९	५०	५३	५३	५२	४८	४१	३०	३९	३	४३	१९	५१	१८ २८	४०	५०	९	१६	१८	२३	३	४८	२७	०
२८	४२	२	४२	२२	५६	०	१२	४१	३२	५५	४२	५२	५२	२८		४०	५४	५६	४३	३	५५	५२	२	६	०
																							७	७	०
५२	८	५८	४५	२९	२२	४४	२७	३२	३५	३९	३७	२	५४	५२	३२६	५४	०	८	४६	२२	५	४६	५	४५	०

	सू	चं	मं	बु	बृ	२०	२८
पूर्णगति·	१४ ०	३२ ०	७५ ०	३० ०	३३ ०	१२ ०	४९ ०
विश्वगति	१३ ४०	३१ ४०	७२ ०	२८ ०	३२ ०	११ ०	४८ ०
पू·अ	२ २०	५ २०	१२ ३०	५ ०	५ ३०	२ ०	८ १०
प्रा· प्रथ·आस	२ १६ ४०	५ १६ ४०	१२ ० ०	४ ४० ०	५ २० ०	१ ४० ०	८ ० ०

सू	चं	मं	बु	बृ	शु	श
भाग	भाग	२३५	२३३	७०	२६२	३९
	अंश	२३२	२३२	७२	२६०	४०
भाग	अंकला	३८ १०	३२ १०	११ ४०	४३ ४०	६ ३०
भाग	अंविकला	३८ ४०	२२ ०	१२ ०	४३ २०	६ ४०

अथ स्वांशोनां मंदोच्चमाह द्युपंचसमचंद्रानपाश्चंद्युगाणामपूर्वं रवेर्मंदतुंगं प्रदिष्टम् कुजस्याब्धिपोदिग्द्युपंचरस
सैतथाज्ञस्यसप्ताभचंद्राश्वयिदाः ७ गुरोःपंचवंकाष्टिनःस्वश्वतर्कोऽम्गोद्दौनवाङ्गाः कुपंचत्रिदस्राः
शनेस्सप्ततर्कोऽष्टिनःसप्तएमाः खरमाभ्रयोर्वान्तियातान कुनादेः ८ रपंखवेद्राश्वगणादिदस्राभौम
108 स्यपातःकिलसांप्रतोयम् अंमंनखाभमितकतावुधस्यद्योगाभवः खांबुधपागराश्च ९ शुक्रस्यभूगोन
यताःकुवेदाः शनेस्त्र्यंशस्यधुवोस्ति दस्राः जगुरुक्रयोःपातमवोधुवोवस्वशीघ्रकेन्द्रागवतो स्फुटोस्तः
१० अथ स्वांशोनां मंदोच्चानि भौमादीनां पाताश्चकोष्ठे लिख्यंते एतेस्तोकाः प्रकटार्थाः अथ मंदके
न्द्रबलकेन्द्रयोरानयनमाह मंदतुंगरहितः खचरः
स्यान्मंदकेन्द्रमथचंचलतुंगं खेचरेण रहितं चलकें
द्रं त्रिभिः क्रतपरानिचवक्रे ११ ओजपदमि

सू	चं	मं	बु	बृ	शु	श		मं	बु	बृ	शु	श	
२	४	७	९	५	२	७		०	०	२	१	३	
४७	१०	१०		२४	१९	२६		१०	२०	१९	१९	१०	
२६	२	२७		२४	५४	३७		३	४२	४०	४०	२२	
५४	२२	५५		६	२३	३०		२२	१९	१८	३३	३६	

रा म०
१०८

तिताम्निभवंतियातमोजचरणोचभुजः स्यात एष्यकं समपदे किलवामेत्रयंततः भुकिलकोटिः १२ जूकमेष
वक्रेनेमहदुवेंद्रेमांद्यैर्भवफलंधनमस्वम शीघ्रजेफलमतोविपरीतंप्राकृतनैर्निगादितंनिजतंत्रे १३ ए
तेषांपद्यानामर्थः मंदोच्चरहितोग्रहः मंदकेंद्रं भवति अथशीघ्रोच्चंग्रहेणरहितं शीघ्रकेन्द्रं भवति
केन्द्रस्यराशित्रयपरिमाणएकैकं पदं भवति एवंचक्रेचत्वारिपदानि भवंति अथोजपदमितिप्रथमंपदं
विषमंद्वितीयंसमंतृतीयपदयोर्यातिंभुजः स्यातद्वितीयचतुर्थपदयोः एष्यंभुजः स्यातभुजरहि
तंत्रिभंकोटिर्भवति अथकेन्द्रवशात्फलस्यधनर्णतामाह जूकमेषचक्रेइति मंदकेन्द्रेतुला
दिकेसतिमंदफलंधनंभवति मेषादिकेसतिऋणंभवति शीघ्रकेन्द्रेमेषादिकेशीघ्रफलंधनंवि
पलितुलादिकेसतिऋणंभवति अथपरिधिस्फुटीकरणमाह ओजातयुग्मान्तपरिध्यंशकांशवि
श्लेषनिघ्नीनिजदोर्लवज्या त्रिज्योद्धृतायुग्मवृत्तान्हृणंस्वमोजाधिकोनेपरिधिः स्फुटः स्यात १४

अस्यार्थः ओजयुग्मांतपरिध्यंतरेण स्वभुजज्यागुणा भांशपरिध्यंतरं चेन्मंदकेन्द्रदोर्ज्या ग्राह्या शीघ्र
परिध्यंतरं चेच्छीघ्रकेन्द्रदोर्ज्या ग्राह्या त्रिज्याभक्तं फलं युग्मांतपरिधौ ओजाधिके सति ऋणं का
र्यं ओजोने धनं कार्यं परिधिः स्फुटः स्यात् अथ स्फुटपरिधिभिर्मांदांत्यफलज्यां शीघ्रांत्यफलज्यान
109 यनं ततो भुजफलकोटिफलानयनं चाह स्फुटीकृतस्य परिधेः खलु षष्ठकांशः षष्ट्या मिते त्रिभग
णेन्त्यफलस्य जीवा स्पष्टा तया विनिहते भुजकोटिजीवे त्रिज्योद्धृते च भुजकोटिफले भवेतां ९५ अ
स्यार्थः षष्टिमितत्रिज्यायां स्फुटपरिधेः षष्ठांशोऽन्त्यफलस्य जीवा स्पष्टा स्यात् तया गुणिते भुजको
टिजीवे त्रिज्याभक्ते भुजकोटिफले भवेतां अत्रोपपत्तिः स्वल्पराशिकेन भांशपरिधौ षष्टिमिता त्रि एम०
ज्या लभ्यते तदा मंदपरिधिना वा शीघ्रपरिधिना किमिति अत्र षष्ट्या भांशानामपवर्त्ते कृते स १०९
ति हरस्थाने षड्वनिते स्वभपयन्नं परिधिषष्ठांशोन्त्यफलज्या भवतीति पुनरुच्यातः त्रि

ज्यापवर्गस्य फलस्यालब्धं ततो रेखापादाशेषयाः एकोटिज्यापादविकिमिति लब्धं फलं स्वभुजफलं स्वकोटि
फलं च भवति अथ शीघ्रकर्णानयनमाह त्रिभज्याकोटिफलज्ययोः योगान्तरं नक्रकुलीरकेन्द्रे शी
घ्रयन्तदा फलवर्गयोगात् मूलं चलः स्यात् कर्णः फलाख्येन १६ अस्यार्थः शीघ्रकेन्द्रे मकरादि
स्थिते त्रिज्याकोटिफलज्ययोर्योग कार्यः कर्कादिके सति अन्तरं कार्यम् अथ योगवर्गस्य वान्तर
वर्गस्य भुजफलवर्गेन योगः कार्यः तस्मात् मूलं ग्राह्यं स फलाख्ये शीघ्रकर्णः स्यात् अथ शीघ्र
फलानयनमाह त्रिज्याघ्नात् फलात्रिज्यकयाविनिघ्नात्कर्णाद्धृतात्लब्धधनुर्लवाद्यं शीघ्रफलं स्यान्मृ
दुहोः फलस्य चापं बुधैर्मन्दफलं निरुक्तं १७ अथ शीघ्रकर्णे विनैव फलानयनमाह तद्यथा स्वकर्णको
ष्ठभुजफलं यत्तत्त्रिज्यया विभिन्नितिफलस्य छायापुत्रा यं शीघ्रफलं भवति अस्यार्थः शीघ्रभुजफ
लात्त्रिज्यागुणात्कर्णेन भक्तात् लब्धं फलस्य चापं मन्दफलं स्यात् अत्रोपपत्तिः शीघ्रकर्णोनेनभुजफलं त

तद्दर्शितमार्गेणेति फलस्य धनर्णं शीघ्रफलं भवतीत्युपपन्नम् अथ मन्दफलसाधनार्थं मन्दकर्णो रविगणित
त्वात्तत्स्थाने लोकः सोत्रावश्यमपेक्षितः तं विना मध्यशीघ्रफलस्याद्धेमित्यस्योपपत्तिर्न सिध्यति
अथ फलहानक्रममाह मध्ये बलाद्धं किल मान्दमर्द्धं दत्वा ततो मन्दफलं समस्तं मध्यग्रहे तत्र फलं बलं
चलसर्वं प्रदेयं ध्रुवः स्फुटः स्यात् १८ अस्यार्थः आदौ मध्यग्रहे शीघ्रफलार्द्धं देयं ततो मन्दफलार्द्धं शी
घ्रफलार्द्धसंस्कृते देयं एवं फलद्वयं संस्कृते मन्दफलं समस्तं मध्यग्रहे देयं तस्माच्छीघ्रफलं संपूर्णं मं
दस्पष्टे देयं ग्रहः स्पष्टः स्यात् अथ मन्दकर्णो मान्दफलवासनोच्यते अभीष्टत्रिज्याभि
तप्रकटेन कक्षावृत्तं कार्यं तत्रोच्चनीचगा रेखा कार्या तिर्यग्रेखा च कार्या मध्य ऊर्ध्वरेखावृत्तसंपाते
उच्चं अधःसंपाते नीचं चांकनीयं उच्चाद्वृत्ते मन्दकेन्द्रं दत्वा चिह्नं कार्यं चिह्नान्मांधांत्यफलज्यापा
मं दण्डधिकार्यः तत्केन्द्रं मन्दकेन्द्रस्य प्रान्ते रेखा लघ्वान्त्यफलपरिधिर्नं कार्या तत्रापूर्वपालिरे

110

ग्रह॰ ११०

खासंपातेउच्चं अधःपालिरेखासंपातेनीचं कल्पनीयं मंदपरिधौ मांशाः कल्पनीयाः तत्राप्युच्चात्मं

दकेन्द्रं विलोमदिशि दत्वा चिह्नं कार्यं अस्माच्छीघ्रांत्यफलज्यार्द्धेन शीघ्रपरिधिः कार्यः अत्र शीघ्रां

त्यफलज्यार्द्धेन शीघ्रपरिधिः कार्यः अत्र शीघ्रांत्यफलज्यार्द्धं मंदपरिधित्रिज्यामानेनयात्वा

नतु मस्य त्रिज्यामानेन मंदपरिधिशीघ्रपरिधिकेन्द्रगतारेखा उपरि शीघ्रपरिधिपालोपन्नल्या

तितत्र शीघ्रोच्चं कल्पनीयं उच्चाच्छीघ्रकेन्द्रं प्रथममंदकेन्द्रविलोमदिशि दत्वा चिह्नं कार्यं तच्चि


ह्नात् मंदपरिधिकेन्द्रपर्यंतं रेखा कार्या सशीघ्रकर्णो भवति मंदपरिधौ शीघ्रकर्णोच्चरेखयो

रंतरं शीघ्रार्द्धफलं भवति इत्यमेनकेन्द्रमेकफलसंस्कृतं जातं पुनः शीघ्रकर्णः मंदपरिधौप

त्रलग्रस्तत्र तथैव मांघांत्यफलज्यार्द्धेन मंदपरिधिः कार्यः अत्रोच्चरेखा तु शीघ्रकर्ण एवास्ति

अत्रापि पूर्ववदुच्चं कल्पयित्वा मंदकेन्द्रं प्रथममंदकेन्द्रदिशि दत्वा चिह्नं कार्यं तच्चिह्नाद्दृढमंदप

रथीकेन्द्रपर्यन्तं रेखाकार्या समन्दकर्णो भवति समन्दकर्णो ह्रस्वमयपरिधौ लोपत्र्यलयसत्वाद्विष्टशीघ्रक
र्णोनारमं ह्रद्ध्वफलं ज्ञेयं इत्यनेन ह्रस्वमंदपरिधौ मन्दकेन्द्रफलह्रस्वं संस्कृतेन जाततस्पष्टदोर्ज्याकोटिज्यां
विधाय मंदकर्णः साध्यः तस्मान्मंदफलमानेयं तन्मध्यग्रहे संस्कार्यं सम्मंदस्पष्टो भवति मंदकर्णः
कक्षावृत्ते — ग्रहस्तत्र मंदस्पष्टविंदुर्ज्ञेयं तस्माच्छिद्राच्छीघ्रान्त्यफलज्यावृत्तं कार्यं तस्याद्ध्वाधि
रेखा तु मंदकर्णस्याय भवति मंदस्पष्टशीघ्रोच्चां तरस्यं शीघ्रा पूर्वे दिशि हत्वा दोर्ज्या कोटिज्या चकार्यो
दोःफलं कोटिफलं चानेयं कोटिफलं कर्क्यादिकेन्द्रे त्रिज्यायां शोध्यं मकरादिकेन्द्रे योज्यं यतो मकरा
दिकेंद्रे कोटिफलं त्रिज्याग्रादुपरि भवति कर्क्यादिकेंद्रे त्रिज्याग्रादधो भवति एवं कृते स्पष्टाको
टिर्भवति स्पष्टकोटिदोःफलवर्गयोगपदं कर्णो भवति कुतः जात्यत्रिभुजत्वात् पुनर्ज्यातभुजफलं त म०
कर्णाप्तं भवति तस्य धनुः करणार्थमनुपातः त्रिज्यया कर्णाये त्रिज्याग्रे किमिति लब्धस्फु १११
स्य चापं कक्षावृत्ते मंदकर्णशीघ्रकर्णः कक्षावृत्ते लग्नस्तत्र स्पष्टो ज्ञेयः गरेखमुपपन्नं मध्येशी



112

अथ प्रकारांतरेणोच्यते शीघ्रफलार्द्धं मंदफलार्द्धसंस्कृतग्रहान्मंदकेन्द्रमानीय पुनर्मंदशीघ्र
फलाभ्यामसंस्कृतमध्यग्रह एव संस्कारः कृतो न लिखितेन स्फुटायते ग्रहमंदोच्चस्य शीघ्रफला
र्द्धं मंदफलार्द्धाभ्यां मंदशीघ्रफलसंस्कार उक्तो भवति तत्र मंदोच्चस्य ग्रहशीघ्रफलार्द्धतुल्यमेव मं
दफलं ग्रहमंदफलार्द्धतुल्यमेव शीघ्रफलं भवति एवं ग्रहशीघ्रपरिध्यर्द्धतुल्यो मंदपरिधिर्ग्र
हमंदपरिध्यर्द्धतुल्यः शीघ्रपरिधिश्च ग्रहमंदोच्चस्य भवतः तत्र ग्रहान्मंदोच्चो मंदगतिलाद्ग्र
हस्पष्टतो वस्तुतो गणनीयः शीघ्रोच्चोपि ग्रहापेक्षया शीघ्रगतित्वात् सर्वे भाग्य एव नियमेन गण
नीयः तत्र शीघ्रोच्चस्य ग्रहाच्छीघ्रगतिकत्वाच्छीघ्रोच्चाद्ग्रहं हृत्वैकस्य परमार्थतः शीघ्रकेन्द्रं एम०
विक्षेपं एवं मंदोच्चस्य मंदगतिकत्वाद्ग्रहान्मंदोच्चे शोधिते एकस्य परमार्थतः मंदकेन्द्रं विक्षेपं तत्र ग्रह ११२
मंदोच्चे एवं मंदफलशीघ्रफलसंस्कारः कर्तव्यो भवति ग्रहकेन्द्रस्य स्पष्टस्य परिज्ञानाय परंतु ग्र

हमंदोच्चार्थमपि मंदोच्चशीघ्रोच्चभगणास्तत्परिधिपरिमाणादिकं कथनेऽग्रे यथोक्तं वा प्रत्यग्रहं मंदशीघ्रफला
द्वित एव लाघवेन कार्यस्याव्यभिचारेण सिद्धे मंदपरिधिनशीघ्रपरिधिजफलयोरद्वीकृतयोरेकरूप
त्वपादैकस्याभावात्तयोर्मंदोच्चसंस्कारे क्रियमाणे मंदोच्चापि मंदोच्चशीघ्रोच्चतत्परिध्यादिकेन
क्रियाभ्यां तस्मात् क्रियागौरवापत्तेर्लाघवान्मध्यग्रह एव शीघ्रमंदाद्भफलयोर्वैयामर्थ्यं संस्कारे कृ
ते सति मांदकेन्द्रस्याव्यभिचारेण सिद्धे मध्यग्रह एव संस्कारद्वयपर्यायोगं धनर्णत्वेन समाहृतं
एवं च तन्मध्यग्रहे मांदशीघ्रफलं धनं वेन्मंदोच्चेनागमेव ग्रहे ऋणं चेन्मंदोच्चे धनमेवेति मंदोच्चवि
परीतो ग्रहसंस्कारे ग्रहविपरीतो मंदोच्चे इति भवति तथा सत्येव केन्द्रस्याव्यभिचारेण सिद्धेः एवं ग्र
हशीघ्रोच्चभगणा एव स्पष्टा भूनाः ग्रहमंदमंदोच्चस्य प्रत्यगाते भगणा भवन्ति एवं ग्रहभगणा ए
व ग्रहमंदोच्चस्य शीघ्रोच्चभगणा भवति एवं च ग्रहमंदोच्चस्य मंदशीघ्रपरिधी मंदशीघ्रोच्चेत

न्द्रगणाश्चेद्मध्ये शीघ्रफलस्यार्द्धमानं मन्दफलं तथा इत्यनेन सूचिता भवतीति विवेचनीयं अथ धन
र्णेतोपपत्तिः कस्मादत्र मन्दपरिधिकेन्द्रे केन्द्रं मन्दकेन्द्रं गत्वा पूर्वतो गच्छति मन्दपरिधौ तत्केन्द्रं स्वस्या
113 न एव मन्दकेन्द्रं गत्वा पश्चिमतो भ्रमति तेन मन्दकर्णः मेषादिके केन्द्रे मध्यमात्पश्चिमत एव भवति तुला
दिकेन्द्रे पूर्वेन एव भवति अतो मन्दफलं मेषादौ ऋणं तुलादौ धनं भवति शीघ्रपरिधौ केन्द्रं मन्दस्प
गत्वा पूर्वतो गच्छति शीघ्रपरिधिपालो ग्रह इव शीघ्रकेन्द्रात्पश्चिमतो भ्रमति शीघ्रनीचरेखा मन्दकर्णे
रेखातो मेषादिके केन्द्रे पश्चिमत एव भवति तुलादिकेन्द्रे पूर्वत एव भवति तेन शीघ्रफलं मेषादौ धनं तु
लादौ ऋणं भवतीत्युपपन्नं अथ फलचतुष्टयं भौमादिपञ्चग्रहाणां देयं सर्वं वा द्वयोः स्फुटमन्दफ एम०
लमेव देयमित्याह उक्तप्रकारेण खलु स्फुटत्वं भौमादिकानां गणकैर्विधेयं मान्दफलं केवलमे ११३
व देयमिति भवेत्त्वापि निशाकरस्य २८ अहः यद्यं स्पष्टार्थम् अथ यातिस्पष्टीकरणमाह मं

होच्चभुक्तिं विधुमध्यभुक्तेर्विशोध्य शेषज्याविवरादिकृत्वा फलं पुरावत्स्वमृणं गतौ तौ स्यान्मंदस्फुटा कि
मगादिके केन्द्रे २० अस्यार्थः चंद्रमंदोच्चगतिं मध्यचंद्रभुक्तेर्विशोध्य शेषं चंद्रस्य मंदकेन्द्रगतिर्भवति
अन्येषां ग्रहाणां मध्यगतिरेव मंदकेन्द्रगतिरस्ति अस्याः शेषज्या नरसाध्यं तद्यथा अद्यतनमंदकेन्द्र
भुजस्तु ज्ञात एवास्ति तस्य शेषज्यापि ज्ञातास्ति श्वस्तनमंदकेन्द्रभुजं विधाय शेषज्या कार्या ततस्तदंतरं मां
द्यांशफलज्यागुणं त्रिज्याभक्तं गतिमंदफलं भवति तत्फलं मध्यगतौ कर्कादिकेन्द्रे धनं मकरादिके
न्द्रे ऋणं कार्यं मंदस्पष्टा गतिर्भवति एवं सर्वेषां मंदस्पष्टा गतिः कार्या अथ धनर्णतोपपत्तिः
अद्यतनश्वस्तनमध्ययोरंतरं मध्यमा गतिर्भवति मंदस्पष्टयोरंतरं मंदस्पष्टा गतिर्भवति
मंदस्पष्टयोरंतरं मंदस्पष्टा गतिर्भवति फलयोरंतरं गतिफलं भवति तत्र मेषादेः कर्कादिस्थे
नें फलं ऋणं भवति कुतः अद्यतनऋणफलात् श्वस्तनऋणफलं अधिकमस्ति अनयोरंतरे

त्रिभमारोपफलांतरं ऋणशेषमेव भवति एवं मकरादिमेषादिपर्यन्तं अद्यतन धनमंदफलात् ह्य

स्तनं मंदफलमूलं भवति संशोध्यमानं धनमृणत्वमेतीत्यनेन न्यायेन त्रिभमारोपणे ऋणशेषमेवा

वशिष्यते न मकरादेः कर्कोद्यपर्यन्तं गतिफलं ऋणं भवतीत्युपपन्नं एवं कर्कादितुलादिपर्यन्तं

मद्यतनऋणफलात् ह्यस्तनऋणफलं न्यूनं भवति तत्र शोधने त्रिभमारोपे धनशेषं भवति एवं तुला

दिमेकादिपर्यन्तं अद्यतनधनफलात् ह्यस्तनधनफलं अधिकं भवति तयोरन्तरे धनशेषमेव तेन

कर्कादिमेकसादिपर्यन्तं गतिफलं धनं भवतीत्युपपन्नं अथ शीघ्रस्पष्टगतिसाधनमाह स्पष्टा

भुक्तेन्दुस्पष्टगतिः फलस्य कोटिज्यका शुअवणांतरेणगुणाप्तकर्णेन विभाजिता च फलांस्वमस्वं एम०

च मंदस्फुटायां २१ फलस्य कोट्यंशका संजिनीतः कर्णोऽधिकोने चातिः स्फुटा स्यात् यथा न ११५

शुद्ध्येद्विपरीतशुद्धौ शेषं भवेद्वक्रगतिर्ग्रहस्य २२ दिनानि नलस्फु खेट्योर्ये द्विस्वपशेषेत

जवोमवेद्वा अस्याथेः स्पष्टशीघ्रकेन्द्रगतिः फलकोटिज्याशीघ्रकर्णान्तरेणागुण्याशीघ्रकर्णे
न भक्ताफलं फलकोटिज्यातः कर्णेऽधिके मंदस्पष्टगतेर्धनं कार्यं फलकोटिज्यातः कर्णे न्यूने ऋ
णं कार्यं गतिः स्पष्टा भवति यस्य फलं गतेर्न शुध्येत्तदा मंदस्पष्टगतिरेव तत्र शोध्या शेषं ग्रहस्य
वक्रगतिर्भवति दिनान्तरालस्पष्टखेटयोर्विश्लेषे यच्छेषं सा ग्रहस्य गतिर्भवति अत्रोपपत्तिः शी
घ्रफलकोटिज्याकर्णान्तरं परमं ले गतिफलं परमं तत् फलकोटिज्याकर्णान्तराभावे गतिफलाभावो गा
तिफलाभावः मध्ये तु पातः फलकोटिज्याकर्णान्तरं परमत्वमुच्चसमे ग्रहे [illegible] फलज्यातुल्यं भव
ति फलस्याभावात् फलकोटिज्या त्रिज्यातुल्या भवति गतिफलं परमं च परमं भवति तद्यथा
अद्यतनश्वस्तनकेन्द्रयोर्मीतरं [illegible] फलज्यागुणं त्रिज्याभक्तं गतिफलं भवति पुनरनुपातः
अंत्यफलज्यातुल्येन फलकोटिज्याकर्णान्तरेणाहं तदेष्टेन फलकोटिज्याकर्णान्तरेण किमि

तिपुनरन्त्यातः कर्णाग्रदृढंतत्त्रिज्याग्रविमितमन्तुल्ययोरंसफलज्ययोस्त्रिज्ययोश्चनाशेकृतेकेन्द्रा
तिःफलकोटिज्याकर्णान्तरगुणाकर्णेमन्नाभवतीत्युपपन्नंसर्वसिद्धांतोक्तंगतिफलानयनमक्का
115 रेत्रिज्याकर्णान्तरान्तहीनमल्पितयथामंदस्फुटेमतांभुक्तिंमोत्युशीघ्रोच्चमन्तिःततस्तत्पवविवरेणाय
कृत्यात्रिज्यांत्यकर्णयोः १ चलकर्णेदृढंतमन्नोकर्णेत्रिज्याधिकेधनं न्यूनामूलेऽधिकेप्रोच्यमन्नेव
क्रान्तिर्भवेत २ अत्रत्रिज्यासकर्णान्तरस्थानेफलकोटिज्याकर्णान्तरेमेवव्याख्येयमन्नेनार्थेनस्कु
तन्तुचंद्रेत्यादिसौरान्तवक्रकेन्द्रभुमौमाद्दीनांगतिःअस्मामायाति त्रिज्याकर्णान्तरेणहीनगतिः एम०
कर्मनायाति अत्रोच्चसमेमध्येनउदाहरणं भौमस्यवक्रकेन्द्रांशाः १६४ भुजः ०।१६ अस्य ११५
ज्या १६।३२।२८ भुजफलं १०।४०।४५ कोटिफलं ३०।३२।२८ ककादिकेन्द्रत्वात्त्रिज्यायां शोधितं
शेषवर्गोभुजफलवर्गयोगपदंकर्णः २५।४८ अनमध्यागतिस्त्पष्टमन्दस्पष्टागतिर्हीना अ


थभौमशीघ्रकेन्द्रगतिः २७।५२ फलकोटिज्याकर्णान्तरेणानेन २८।२६ गुणिता ७८।३६ कर्णोना
नेन २५।५८ भक्ता लब्धं गतिफलं २१।५१ फलकोटिज्यातः कर्णस्य न्यूनत्वाज्जातं मार्गफलं अस्य
मध्यमगतेश्चान्तरे जाता गतिः ५ स्पष्टं तस्मात्त्रिज्याकर्णान्तरस्थाने फलकोटिज्याकर्णान्तरमेव ग्राह्यं ए
तादृशो सौराशयमविदित्वा यथावस्थितं व्याख्यानमंगीकृत्य कमलाकरेणात्र विषये भास्करचा
र्यस्य दूषणान्तरं तत्सत् भास्कराचार्येण सौराशयानुसारेणैव गणितं निबद्धं कोटीफलघ्नीमारि
ता अथ सौरोक्तान्वक्रमार्गावलकेन्द्रांशानाह कृतर्तुचंद्रै १६४ वेगावेरचंद्रै १४४ खरामचं
द्रै १३० हृतभुजनरैः १६३ ॥२३॥ शरभुवचंद्रै १५५ स्वबलकेन्द्रभागैः स्युर्वक्रिणो भूमिसुताद्य
श्च स्वैर्वक्रभागैर्भगणाच्छुद्धैः स्युर्मार्गिणः स्वस्वचरणस्थलांशैः २४ अस्यार्थः कृतर्तुचं
द्रादयो यथाभौमादिकानां शीघ्रकेन्द्रांशाः स्युः सन्ति तदा यथाक्रमं वक्रिणो ज्ञेयाः एतैरेव भागैर्भ

116

गागाशुद्धैः समापत्तमौमादिकानां चलकेन्द्रांशा भवंति तदा नेमा गतिर्णा भवन्तीति ज्ञेयं एतेके
न्द्रांशाः ६६ गतिफलं मौलतंत्रादिषु लिखितत्वाल्लिखितं यदास्य स्पष्टपोरवंतरं क्रियते तैस्तैः तेषु केन्द्रांशेषु
गतिः शून्यं न भवति भौमस्य गतिमंदफलाभावे द्विषं चेत्तुमित १५२ चलकेन्द्रांशैर्गतेः शून्यत्वं भव
ति बुधस्यैतावन्मितैः शीघ्रकेन्द्रे १४५ गतिः शून्यं भवति गुरोः १२० एतावन्मितैः केन्द्रैर्गतिः शून्यं भव
ति शुक्रस्य १६२ एतावन्मितैः केन्द्रैर्गतिः शून्यं भवति शनेः १०६ एतावन्मितैः केन्द्रैर्गतिः शून्यं भ
वति इति अथ पूर्वमुक्ता अपि अर्धफलाख्याः संस्कारान्तरतो रेखागणितेन नीच्यमाने ऽ
त्राभीष्टत्वेहालिज्यामितपर्केठनकक्षावृत्तं कार्यं नीचोच्चरेखा कार्या उच्चान्मेषादिविलो ग्र०
मं देयं मेषादेर्मध्यग्रहः उच्चाद्यग्रतो देयः ग्रहशीघ्रोच्चं मध्यम मध्यग्रहमंदोच्चाभ्यां हीनं मं ११६
दमंदोच्चं भवति तन्मेषादेर्विलोमं देयं तद्ग्रहमंदमंदोच्चस्य चिन्हं भवति तन्मंदोच्चयोरन्तरं


मंदमंदकेन्द्रं भवति मंदोच्चाच्छीघ्रांत्यफलज्यार्द्धेन वृत्तं कार्यं तत्राप्यूर्ध्वरेखा केन्द्राभिमुखी कार्या तस्मिन्
परिधाववच्चात्पश्चिमतो मंदस्पष्टस्य केन्द्रं दत्वा चिह्नं कार्यं तत्केन्द्रदोर्ज्या कार्या भूकेन्द्रात्तच्चिह्नपर्यन्तं कर्ण
रेखा कार्या सा कर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र शीघ्रफलार्द्धसंस्कृतं मंदोच्चं जातं अत्र शीघ्र
फलमेवार्द्धेन गणितुलाराधनं ज्ञेयं पुनर्मंदस्पष्टस्य शीघ्रोच्चं तु मध्यमग्रहमेवाश्रितत्यस्य मंदोच्चा
न्तरं मंदोच्चस्य शीघ्रकेन्द्रं भवति उक्तकर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र केन्द्रं कृत्वा मांदांत्यफलज्यार्द्धे
न वृत्तं कार्यम् तत्र कर्णरेखैवोर्ध्वरेखास्ति तत्परिधाववच्चात्पूर्वतो शीघ्रकेन्द्रं दत्वा चिह्नं कार्यम्
तत्केन्द्रस्य दोर्ज्या कोटिज्यां कृत्वा भुजफलं कोटिफलं च विधाय कर्णः कार्यः सा कर्णरेखा कक्षावृ
त्ते यत्र लग्ना तत्र फलद्वयसंस्कृतं मंदोच्चं जातं भूकेन्द्रात्स्पष्टोच्चगा रेखा नीचपर्यन्तं कार्या
सा स्पष्टनीचोच्चरेखा भवति तस्यां केन्द्रादूर्ध्वोन्मुखी मांदांत्यफलज्यां दत्वा तत्र केन्द्रं कृत्वा त्रि

ज्यामितकर्कटेनमंडलमतिवृत्तंकार्यंतस्मिन्नुच्चरेखा पश्चलग्नातत्रस्पष्टोच्चंज्ञेयं स्पष्टोच्चमध्यमग्रहान्तरं
फलद्वयसंस्कृतंमंडकेन्द्रंज्ञेयं अत्रशफलं अथ द्वितीयंशफलंशघ्नल रेखकागवेकस्माद्वृत्तंकार्यं
117 घंमकेन्द्रसचयथघंमंडमतिवृत्तं य रवचवरेखास्पष्टोच्चरेखावाकस्माद्वृत्तेकेंमे पारिः खंस्पष्टोच्चंप्र
तिवृत्तेछंमेषादिः यंस्पष्टोच्चंधंमध्यमः थधंमंडकेन्द्रं अपं थचघकोणः ज्ञातोस्ति एतस्मा
गचघस्त्रिभजेगचकोष्यास्पापिजीवास्ति साज्ञातास्ति गघभुज त्रिज्यामितः एतौज्ञातौस्तः गघ
नागघघकोणज्यालभ्यतेतत्चापेघनकि मितिलभ्यं चगघकोणज्या अस्याश्चापंमंडफलंच
गघकोणः अनेनहीनः थचघकोणोजातः थघगकोणश्चंतांमंडफलसंस्कृतंमंडकेन्द्रंजातं ग्र॰
पुनर्गाकेन्द्रंकलाग्नंतंशीघ्रनीचोच्चवृत्तंकेषु एतस्मोच्चंमंडप्रतिवृत्तकेन्द्रसमुखंभवतिस १२
षोच्चंमूकेन्द्रसमुखंभवति चागघगारेखावर्द्धनीये लघुवृत्तपालिपथेन्तं जविन्दुः मध्यमोच्चंक



चिह्नस्पष्टोऽस्मात्तद्विंबं जातं मध्यमशीघ्रकेन्द्रं रेखचापं धनु
ःस्थेन नगाङ्ककोणे न मंदफलरूपेण विलोमं संस्कृतं तत्रस्पष्टकें
द्रं भवति अस्य भुजज्यातद्वत्कोटिज्या वा गतैरेखापांषष्टि
स्तन्मानेन परिणतं शीघ्रांत्यफलज्यान्तरावतं भुजफलं वर्गं
कोटिफलं रेखं मकर्णादिकेन्द्रतुल्या घ्राग्त्रिज्यापांयोजितं जातं
घवं कोटिः अस्य वर्गः तत्तवर्गयुतः जातो घतवर्गः अस्य
मूलं घतं जातं शीघ्रकर्णः कर्णाग्रे परिवृत्तभुजफलं तद्
घमघमत्रिज्याघ्ने किमिति लब्धस्य चापं जातं मगं शीघ्र
फलं रेखमेषादिकेन्द्रतुल्याद्धनं रेखं मंदस्पष्टके रेखगे यो

जितंशीघ्रस्पष्टमंदकेंद्रंदृढकत्वेनस्पष्टखेटेनप्रतंजातःस्पष्टग्रहः अनेनप्रकारेणभौमादिपंचग्रहाणांमंदक
र्णाभावःसिध्यति त्रिज्यायांकोटिफलंयोज्यंवाशोध्यमिदमपिसंगच्छतिरविचन्द्रयोस्त्वनयाकल्प
118 नयामंदकर्णाभावःसिध्यतिपरंतुबिंबयोर्न्यूनाधिक्यंनसंभवति बिंबयोर्न्यूनाधिक्यंतुप्रत्यक्षंदृश्य
तेतेनमंदकर्णोप्यपेक्षितःरविणापिनकृतःस्वल्पान्तरत्वात् अतएवपूर्वाचार्यैःस्वल्पान्तरत्वान्मंद
कर्णोहकरणेहतोनेतादिसर्वग्रहसाधारण्येनमंदकर्णाभावउक्तः स्वनाशरणीयःकमला
करैर्वेदज्ञैःसिद्धान्ततत्त्वविवेकेएकरूपपरिधिकल्पनेसर्पासिद्धान्तेत्रुटितयंथकल्पनांसंकल्प्य
तेतदसत्प्रत्यक्षजनानांप्रतारणमात्रंतन्मतानुसारिभिर्दीक्षामार्देनामभिर्दैवज्ञैःसर्वेपिसिद्धान्तटी
कापांविरणावल्यामेकरूपपरिधिकल्पनंकृतंतदप्यसत्तत्रान्यदपि शीघ्रान्त्यफलन्यायात्मं एम०
दकर्णगुणेननत्रिज्यापाभजनेनस्पष्टखेटकलाफलसाधनंकृतंतदप्यसत् सौरोक्तफलस्यतन्हे ११८



न्यफलस्य चान्तरेणं वांशपरिमितं ८९ ११ गणितविरुद्धमस्त्वविरुद्धंच इति अथभौमादीनांचग्रहाणां

शरसाधनमाह तत्रादौ बुधपौ गीतांशुघटीनां परमशरकला उच्यन्ते खभानि २७० खांका ९०न

खभमयष्ठ्य २२० खांगानि ६० खाकाः १२० खदिवाकराश्च १२० चघटिकानां परमाः खगानांभवन्तिसे

119 वांशकलाः प्रदिष्टाः २२ अथशरसाधनं पातोनमंदस्फुटखेटदोर्ज्यानिघ्नापरमैः शरलिप्तिकाभिः च

लांत्यकर्णेन हृताशरः स्यात्पातोनमंदस्फुटगोलदिक्कः २४ त्रिभघ्नेते त्रिज्यकया विभाजिता भवेत्स्प

ष्टकोऽपमसंस्कृतिक्रमः २५ नेपाथवामंदफलं विलोमं स्यात्तदूनः खलु मध्यखेटः स्यात्पातके

न्द्रंचततः पुराव[illegible]स्पष्टः ९ शल्को गणकप्रवीणैः २६ अथपातोनमंदस्फुटे [illegible] स्याथेऽपात

स्य चक्रशुद्धाः पूर्वं चन्द्रे लिखिताः संतिचन्द्रस्य चक्रशुद्धः पातोराहुस्तस्य [illegible] स्वपातोनः या ग्रम· ११९

तत्कोटिर्भवतीति तस्य दोर्ज्या परमशरगुणा शीघ्रांत्यकर्णेन भक्ता फलस्य चापं शरकलाभवंतिचे

ग्रस्य त्रिज्याभक्ताः शरकला भवंती पातकेन्द्रे मेषादिके शरकला उत्तरा तुलादिके दक्षिणा ज्ञेयः अत्रो
पपत्तिः प्रत्तिपत्तिप्रकारेण भौमादिकानां शीघ्रप्रतिवृत्ते मेषादेः संकाशाद्दक्षिणोतायनपातः अ
नुलोमेष्यः तत्र विहृत्वा तत्रान्यात्रिज्यावृत्तस्य संपातः कार्यः तस्मात्स्थानेर्द्वितीयसंपातः कार्यः पाता
त्रिभान्तरे परमशरकलातुल्यान्तरेणान्तरतः स्पष्टपातात्परमशरकलातुल्यान्तरेण दक्षिणतो विन्दिष्टं
कार्यः ग्रहस्तस्मिन्वृत्ते मेषादेर्यस्य पृष्ठगत्या भ्रमति अस्माभिः स्वल्पांतरत्वात्सकलसाधनार्थं प्रतिमंडल
स्यैव गृहीतः तस्य पातेन यद्वलयं तत्र तावत्केन्द्रं भवति यतः पाततुल्ये ग्रहे शराभावोस्ति पातात्त्रि
भान्तरे परमशरकलातुल्यमन्तरं भवति मध्येन पातेन क्रान्तिवृत्ते ग्रहस्थानेयः सपथ्या त्रिज्यातु
ल्यपातपातयोर्वृत्तयोर्न्त्यपरमशरकलातुल्यमन्तरं लभ्यते तदा इष्ट्या किमिति अस्मिन्त्रिभुजे को
टिः प्रतिभुजे शरभुजः द्वितीयवृत्ते कर्णः पुनः कर्णाग्रे इष्टं तदा त्रिज्याग्रे किमिति स्पष्टपातेन लब्ध

स्वचापं शरो भवति कोणस्तस्माभिः फलसाधनसाधनार्थं भूकेन्द्रात्प्रतिमंडलपर्यन्तं साधितोऽस्ति परं तु स्वल्पां
तरत्वात्स एव न हीतः तेन गणितेन नाकं चिदन्तरं पतति चंद्रस्य प्रतिमंडलाभावात्त्रिज्याग्रस्य वशर स्या
120 त्रितेन तद्दोः पचापे चंद्रस्य शरो भवति एवमनुपाते तुल्य यो त्रिज्यया नीशेहाते मंदकेन्द्रदोर्ज्या परमश
रगुणाशीघ्रकर्णभक्तेत्युपपन्नं अथ पतनी चोच्चवृत्त प्रकारेण शरसाधनमाह पातेथवा मंदफलमि
त्याहिना अस्यार्थः अथ पाते विलोमं मंदफलं दत्वा तद्वृत्तो मध्यखेटः कार्यस्तत्पातकेन्द्रं स्यात् तस्मा
त्पूर्ववत् गणक प्रवीणैर्बाणः साध्यः अत्रोपपत्तिः नीचोच्चवृत्ते मध्यमोच्चान्मेषादिः पूर्ववतो देयः
ततो मंदस्पष्टपातः पूर्ववतो देयः ततो मंदस्य स्पष्टपातः दत्वा चिह्नं कार्यं तत्र नीचोच्चवृत्ते मंदस्थानस्य द्वितीय राम०
वृत्तस्य संपातः कार्यः तद्वृत्तं पातादुत्तरतः वृहद्वृत्तीयपरमशरकलान्तरे रामगपद्मपातादृक्षि १२०
णतो विप्रकृष्टं यथा स्यात्तथा द्वितीयवृत्तं स्थापनीयं शेषोपपत्तिः पूर्ववत्ज्ञेया इति नी

चोक्तमनेनप्रकारेणाशरसाधनं संपूर्णम् अथ ज्योरेखागणितं अथ यवनाचार्यमतेन च स्वप्रमाणेय
हाणां गणितं क्रियस्तुमत्त्रुपयोगिरेखागणितं तन्निष्पत्त्यध्यायानुजं निष्पत्तिगणितमुच्यते अ
थयत्रप्रमाणत्रयमस्ति तत्रैकं मध्यप्रमाणं कल्पनीयं शेषं प्रमाणद्वयं पार्श्वस्थं कल्पनीयं
तत्र प्रथमतृतीयप्रमाणयोर्निष्पत्तिः प्रथमद्वितीयप्रमाणनिष्पत्तिद्वितीयतृतीयप्रमाणनिष्प
त्तिघाततुल्यास्ति यथा कखगं प्रमाणं प्रथक्कल्पितमस्ति खप्रमाणं मध्ये कल्पितं कप्रमाणं प्रथ
मं गप्रमाणं तृतीयं कगनिष्पत्तिः कखप्रमाणनिष्पत्तिखगप्रमाणनिष्पत्तिघाततुल्यास्तीत्यत्र
जोपपत्तिः कखनिष्पत्तिरूपकप्रमाणं १·२८ निष्पत्तितुल्या कल्पिता खगनिष्पत्तिरूपक
प्रमाणनिष्पत्तितुल्या कल्पिता १·१८ प्रमाणनिष्पत्तितुल्या कल्पिता एवं कगनिष्पत्तिरूपकप्र
मानिष्पत्तितुल्या कल्पि १·२४ ता तस्मान्नहन्सर्वं निष्पत्तित्रयस्य प्रमाणं जातं १:२१ स्वक हप्रमाणं

121

स्पनिष्पत्तिः स्वक्लनिष्पत्तितुल्यास्ति पुनः ह्रस्वप्रमाणानिष्पत्तिः | ह्र.१४ | कगानिष्पत्तितुल्यास्तितस्मात् ह्र
वनिष्पत्ति स्वगानिष्पत्तितुल्यास्ता कगनिष्पत्तिः ह्रपहृत्ति | क.ग | ष्पत्तितुल्यास्तितस्मात् ह्रवकनि
ष्पत्तिः ह्रवनिष्पत्तितुल्याजाता वह्रपघातः वतुल्यह्रवास्ति | ह्र.व. ख.ग | ह्रपगुणोनेनाविह्नतत्वात् तस्मा
लगनिष्पत्तिः ह्रह्रघातेनसमानाजाता अथ पंहह्रघातः कख | क.ग. | खगनिष्पत्तिघाततुल्योस्तित
स्मात्कगानिष्पत्तिर्द्वयोनिष्पत्त्योर्घाततुल्याजाते सुपपन्नं ए | ह्र.१रू. | द्वंपा निष्पत्तिस्तत् निष्पत्तितुल्या
स्ति मातक्षितरान्त निष्पत्तिद्वयसमाननिष्पत्तिद्वयघातोभवि | ह्र.१रू. | ष्यति कुतः समाननिष्पत्तिप्र
माणानां न्यधिकाभावात् इदमेवास्माकमिष्टं अथ यदि | ह्र.व० | पूर्वोक्तनिष्पत्तिद्वयंतुल्यं स्या एम०
त्तदा प्रथमतृतीयप्रमाणयोनिष्पत्तिर्मध्यनिष्पत्तिवर्गतु | क. ग. | ल्या भवति अथ यदि एतासां १२१
त्रिसंख्यानिष्पत्तीनां प्रमाणानि भिन्नानि भवन्ति तदा यद् प्र | ह्र.रू. | माणानि भवन्ति तत्प्रमाण

द्रूपं घ्न्यूनिष्पन्नैः प्रमाणैश्चतुर्थ्यं घातरहितनिष्पन्नो भवति तत्र प्रथमप्रमाणं घातनिष्पन्नैः द्वितीयप्र
माणं घातरहितनिष्पन्नं यदि भवति तदा यामविस्तारपिंडसंज्ञं प्रमाणं भवति घातप्रमाणस्य द्वितीयप्र
घातयोः प्रथमप्रमाणद्वये यदि भवति तदा पर्यायदैर्घ्यविस्तारपिंडसंज्ञं भवति दैर्घ्यविस्तारपिंडघाते
यस्तु सप्तघते तद्घनफलं भवति उभयत्रोत्पन्नघनफलं समानं भवति यथा कप्रमाणं खप्रमाणं
निष्पन्नगप्रमाणं घप्रमाणं ङप्रमाणं चप्रमाणं निष्पन्नघाततुल्यं कल्पितमस्ति तत्र कघचप्रमाणा
नां घनफलं खगङप्रमाणघनफलेन तुल्यं भवति अत्रोपपत्तिः गप्रमाणङप्रमाणघातः ङप्रमाण
तुल्यः कल्पितः घप्रमाणङप्रमाणघातः चप्रमाणतुल्यः कल्पितः तस्मात् कप्रमाणघप्रमाणेन ङप्रमा
णेन गुणिते कप्रमाणं चप्रमाणेन जाते खगप्रमाणघप्रमाणनिष्पन्नमिति कप्रमाणचप्रमाणघाति
ष्पन्ना तुल्यो भविष्यति पुनः घप्रमाणङप्रमाणेन गुणितं एवं खप्रमाणेन गुणितं सत् चप्रमाणेन

प्रमाणं चोत्पन्नं तस्मात्ह प्रमाणानिष्पत्तिः गप्रमाणघप्रमाणनिष्पत्तितुल्या ह प्रमाणपप्रमाणनिष्प
त्तिः ह प्रमाणवप्रमाणनिष्पत्ति ह:व: तुल्यप प्रमाणतप्रमाणनिष्पत्योर्घाततुल्यास्ति तस्मात्ह
122 प्रमाणतप्रमाणयोर्निष्पत्तिः प:त: ह:तु: कव वप्रमाणवप्रमाणनिष्पत्तितुल्या जातो तस्मात्क
ल्कतघात आचववघाततुल्यः वह घातेन खगह घाततुल्ये न समानो जाता तदुत्पपन्नं अत्र दैर्घ्यवि
स्तारपिंडेषूत्पत्ति विप्रमाणस्य निष्पत्तिः छितासे दैर्घ्यविस्तारपिंडेषु तादृश यत्र किंचित्प्रमाणं तथा
नि साशेष चतुर्णां प्रमाणानां निष्पत्योर्घाततुल्या भवेत् पयाघप्रमाणगप्रमाणयोर्निष्प
त्तिः खप्रमाणकप्रमाणनिष्पत्ति क:ख ह प्रमाणवप्रमाणनिष्पत्योर्घाततुल्यास्ति अत्रोप राप: १२२
पत्तिः पादिप्रथमघनफले दैर्घ्ये ग:घ: ह:व: विस्तारपिंडसंज्ञानां कघवप्रमाणानां घप्रमाणं पिं
डः कल्प्यते द्वितीयघनफले गप्रमाणं पिंडः कल्प्यते तदा कप्रमाणं वप्रमाणयोर्घातिः प्रथमघ

त्तिः प्रथमघनफलस्य भूमिः स्यात् । एवं प्रमाणस्य प्रमाणयोर्घातः । द्वितीयघनफलस्य भूमिः स्यात् । उभय
त्र घनफलं च समानमस्ति । तस्मात् प्रथमपिंडद्वितीयपिंडनिष्पत्तिः द्वितीयभूमिप्रथमभूमिनिष्पत्तितु
ल्या जाता । २ । एवं एकराशिनि घनसंज्ञाध्याये मयैव निरूपितमस्ति । एवं प्रमाणस्य प्रमाणघातस्य संज्ञव
प्रमाणस्य प्रघातस्य संज्ञयोर्निष्पत्तिस्तस्य तु जनिष्पत्ति घातस्यास्ति । तस्य जनिष्पत्तिस्तु एवं प्रमाणक
प्रमाणनिष्पत्तिः प्रमाणक प्रमाणनिष्पत्ति घाततुल्यास्ति तस्मात् प्रथमप्रमाणग प्रमाणनिष्प
त्तिर्भूमिनिष्पत्त्योर्घाततुल्यास्ति । तदेवमुपपन्नं पक्षोन्तः । पुनरपि घातसंज्ञयोर्निष्पत्तिर्यथा एव
कनिष्पत्तिः एवं निष्पत्त्योर्घातरूपास्ति तथा एवं निष्पत्तिः एकानिष्पत्त्योर्घातोस्ति । तस्माद्घातनिष्प
त्तिर्निष्पत्तिद्वयस्य घातरूपा भवति सैवात्र प्रथमप्रमाणजनिता निष्पत्त्योरपि घातरूपा भविष्यति यदि
प्रथमद्वितीयप्रमाणानि भिन्नानि कल्पितानि । अथ यदि द्वे वा विस्तारपिंडे युते पंक्तिद्वये वा

123 तेविना प्रमाणद्वयं समानं भवतीति तदा शेषचत्वारि प्रमाणानि सजातीयानि संति कुतः यथा येन क्षेत्रयोः
पिंडौ समानौ स्यातां तत्र योर्निष्पत्तिर्भूमिनिष्पत्तिः समाना स्यात् तस्मात् समानप्रमाणद्वयं पिंडः क
ल्प्यते तेन तदा समानपिंडद्वयस्य घनफलं समानं जायते अनयोर्भूमिरपि समाना स्यात् समाकोणस
मानक्षेत्रयोर्भुजाः सजातीया भविष्यन्ति तस्माच्चत्वारि शेषप्रमाणानि समानानि सजातीयानि
स्युः यथा कप्रमाणं खप्रमाणे गाघप्रमाणे च प्रथमे दैर्घ्ये विस्तारपिंडे च खगाहप्रमाणे च द्विती
ये दैर्घ्यविस्तारपिंडे च समाने कल्पिते तेन तदा घप्रमाणं वप्रमाणघाते क्षेत्रप्रमाण हप्रमाणघात
क्षेत्रं समानं भवतः तदा घप्रमाणगाप्रमाणानि निष्पत्तिर्हि प्रमाणव प्रमाणतुल्या भविष्यति अ ए.म०
थवा तृष्ण गृ.घ. ह.व. सजातीयप्रमाणेषु कमज्ञातमानित त्रज्ञातप्रमाणत्रयेण शेषज्ञानं भवति तथे १२३
व षट्प्रमाणेषु ज्ञातपंचप्रमाणैः शेषं ज्ञेयं एवं दैर्घ्यविस्तारपिंडघातः द्वितीयदैर्घ्यविस्तार

पिंडज्ञातप्रमाणाद्भुवघातेनभक्तः स्वस्वज्ञातराशिज्ञानेभवति द्वितीयप्रकारेसुप्रमाणाशब्देनराशिस्थाने
प्रमाणानिपतितेनवस्थाप्यानिप्रत्येकपंक्तौराशिद्वयंलेख्यंतत्रप्रथमपंक्तौघातनिष्पन्नराशिद्वयं
स्थाप्यंमध्येऽवकाशंयथास्यात्तथाद्वितीयपंक्तौघातरहितनिष्पन्नेः स्यन्यावकाशंयथास्यात्त
थाराशिद्वयंस्थाप्यंतृतीयपंक्तौघातरहितद्वितीयनिष्पन्नेराद्यावकाशंपश्चात्तथाराशिद्व
यंस्थाप्यं अनया रीत्यायावत्स्थितिप्रमाणमज्ञातंभवति तत्राक खमध्ये एकोराशिस्तथा
कस्मतीयोयस्यख राशिनानिष्पन्निर्हराशिवृत्तश्यानिष्पन्निरिवस्यात अनेनोक्तंभवतीयः
तस्मात्कराशेर्निष्प त्तिर्हराशिनागराशिघराश्यानिष्पन्निरिवजातातत्राकराशिस्याघः
घराशेर्निष्पत्तिस्तेनतथाभवतियथाहराशेर्निष्पत्तिर्वराशिनास्तिसराशियः कृत्स्नमीयः तस्मा
त्कराशेर्निष्पत्तिः खराशिनागराशियराशिनिष्पत्तिरिवभवेत् तत्राकराशिरपिज्ञातोभवति अ


क		ख
ग	घ	
	ह	च

ष्यवाहयेत्राशेपोराघेःवकोशेराशिस्तथाकरस्य ख्ययातस्य राशेर्निष्पत्तिर्हराशिनाघराशेर्निष्पत्तिरिवभ
वेत सःतराशिःकस्यःतथाकराशेर्निष्पत्तिःखराशिनातथाभविष्यतियथा नराशेर्निष्पत्तिर्वराशि
124 नातस्मि तहाकराशिरपिजातोभविष्यति अनेनप्रकारेणाशेषराशीनांमध्येयोऽज्ञातोस्तितस्यान
यनंकर्तव्यं इदं स्तंभवति इतिघातनिष्पत्तिप्रकारणं अथकोणास्वरूपंतत्प्रमाणं
चाच्यतेभुजद्वयोम ना सर्वोकोणशब्देनोच्यतेतभुजद्वयोपरिगतं चापंकोणप्रमाणम्
वति सकोणःकेन्द्र गतोभवत्यथवाबृहज्जयालिगतोभवति यस्मिन्नंतरे कोणत्रिभुजेत्रिपतेतत ६५

क	ह	ख
ग	घ	प
त	ह	ब

रानत्वोणात्रयेपिपरिधिर्विभक्तोभवति तस्माद्घचापप्रमाणंतदेवकोणप्रमाणंभवति यस्मिंको ताम०
णप्रमाणानिज्ञातानिभविष्यन्तितत्रकोणानिष्पन्नयोपिविदितामवेयुः तद्भुजनिष्पत्तमोपि २५
ज्ञाताभवेयुः पुनःसमकोणप्रमाणंपरिधेर्भागद्वयमितमस्ति यदेतेकोणाःकेन्द्रसमीपस्थाःत्रि

यस्मात्तैस्तत्प्रमाणानि पूर्वप्रमाणेभ्योऽर्द्धमितानि स्युः कृतश्चो कोणानांचापनिष्पन्नेः स्पष्टत्वात् कथं पुनः के
न्द्रकोणाः त्रत्रपातिकोणेभ्यो द्विगुणा भवन्ति परिच्छेपोश्चापे समाने भवतः पुनश्छेत्तृकोणानां चा
पानि केन्द्रकोणचापेभ्यो द्विगुणितानि भवन्ति परिच्छेदौ कोणौ समानौ भवतः इति कोणस्वरूपं सप्रमाणं
निरूपितम् अथ कोणास्तु सुखभुजानां कोणाजीवानां निष्पत्तिः समाना भवतीत्याह कोणस्सन्मुख
बाहूनां निष्पत्तिर्गोदितापरा तत्कोणजीवयोश्चापि निष्पत्तिर्विदिता भवेत् १ सूत्रमार्थं यथा क
खस्य निष्पत्तिः कोणनास्ति तथा पुनः ग कोणजीवानिष्पत्तिः ह कोणस्य जीवया २ सूत्रमार्थं अत्रोप
पत्तिः ग कोणा ख कोणमुनौ वर्द्धनीयौ गराह खघ खत रेखाश्च समानाः कार्याः पु
नः ग केन्द्रं कृत्वा ख केन्द्रं च कृत्वा समाने रेखार्द्धमासेन हह चापघत चापं चाकार्ये न हद ल
घतघलवोऽस्खे रेखायां कार्यौ एतौ लम्बौ गकोण खकोणयोर्ज्ये भवतः पुनः कल



125

तत्र गणरेखापातादिः तत्र बालगत्रिभुजे हऌगत्रिभुजं सजातीयं निविष्यति तत्र हऌकलरेखयो निष्पत्तिः
गहकगरेखयो निष्पन्नासमानाभवति पुनः कलखत्रिभुजं तघखत्रिभुजं सजातीयमस्ति तत्र
कलतघरेखयोर्निष्पत्तिः कखतखरेखयोर्निष्पन्नासमानाभवति अत्र कखरेखाया निष्पत्तिः
गहरेखाय्याप्तितरखाहयोस्तुल्यत्वात् तस्मात् हऌमोवा या निष्पत्तिः तघजीर्वपातयाप्तित
याकखभुजनिष्पत्तिः कगभुजेन अत्र हऌखयोः प्रमाणयोर्मध्यफलप्रमाणमस्ति तस्मात्
हऌतकयोर्निष्पत्तिर्घातनिष्पत्ति जाता कयोः हऌकलनिष्पत्ति समानगहकगनिष्प
त्तिकलतघनिष्पत्तिसमानवाखत खनिष्पन्नोऽधोतास्ति अत्र पहुमप्रमाणखगाह
तखप्रमाणेत्रिज्यातुल्यसमाने ए तउभयोर्घनफलयोपि रूपकल्पिते अत्राव
शिष्टप्रमाणसाचतुष्टयं सजातीयं जा ते तस्मात् हऌतघयोर्निष्पत्तिः कखकगनिष्प

हऌ· कल·	गह· कग·
कल· तघ·	कख· तख·

त्रितुल्या ज्ञाता प्रथमप्रमाणाद्द्वयोरेकोणयोर्ज्ञातैव स्तः अपरं प्रमाणाद्द्वयं भुजोऽस्ति तैः कोणो ज्ञातो नो
चेन्निष्पत्तिस्तुल्या भवति तदुपपन्नं अथ समकोणत्रिभुजे द्वौ भुजौ ज्ञातौ तौ लः वा समको
णातिरिक्ते एककोणः ज्ञातो भवति तदा शेषकोणाः शेषभुजाश्च ज्ञाता भविष्यन्ति कुतः
समकोणः सदा ज्ञातः एव वास्ति ज्ञातकोणस्य कोटिरस्ति तौ परकोणे सम्मिलितः सु न पानिष्पत्तिः को
णानीव पोनिष्पत्तिरिवास्ति यदि समकोणातिरिक्ते द्वौ कोणौ ज्ञातौ स्तः भुजः कोऽपि न ज्ञातोऽस्ति तदा
प्रोक्तप्रकारेण कोणाः सर्वे ज्ञाता भविष्यन्ति भुजानां निष्पत्तयश्च ज्ञाता भविष्यन्ति परं तु भुजप्र
माणानि न ज्ञाता भविष्यन्ति यद्येको भुज एव ज्ञायते तदा न किमपि ज्ञातं भवति यदि समकोणत्रि
भुजे न स्यात् तदपदा सर्वे भुजाः ज्ञाताः अपेक्षिता भवन्ति वा भुजद्वयमेकः कोणश्च ज्ञातो भवति
तदा शेषकोणाः भुजाश्चापि विदिताः स्युः अनेन प्रकारेण तद्यथा एककोणात् तत्सन्मुखो भुजो ल्लेवः

हर	तघ
गह	कग
रवक	तव

कार्यः अनेन त्रिभुजद्वयं समकोणं भविष्यति ताभ्यां पूर्वोक्तप्रकारेण भुजज्ञाने साज्ञाने च भविष्यति प
रिचेयो भुजः कोणद्वयं च ज्ञातं स्यात् तदा शेषं लंबनिपातसंज्ञेन विज्ञेयं ज्ञातं स्यात् कुतः कोणद्
वयोगश्चाष्टादशेभ्यः १८० शोध्यते शेषं तृतीयकोण एव भवति भुजयोर्निष्पत्तिस्तत्कोणस्यपा
126 निष्पत्तिरेवास्ति यदि कोणत्रयं ज्ञातं स्यात् भुजः कोपि न ज्ञातः स्यात् तदैकप्रकारेण भुजनिष्प
त्तयो ज्ञाता भविष्यन्ति न तु भुजप्रमाणानि यदि चैकः कोणो ज्ञातो द्वौ कोभुजौ ज्ञातौ स्यातां वा एकः कोण
भुजौ ज्ञातौ वा भुजद्वयमेव ज्ञातं न कोपि कोणस्तदा किमपि शेषं न ज्ञातं स्यात् इति भुजनिष्पत्तिर्जी
वानिष्पत्तिसमाना भवतीति निरूपितं अथ समसूत्रस्थिते व्योममध्यादि ज्ञानप्रकारमाह तत्र श्लोकाः स रामः
मसूत्रस्थितयोर्योस्तारकयोर्व्योमकोः स्पष्टकं विषुवांशान्तराधपि लास्यात् भद्विघ्नं स्पष्टकं २ एवं १२६
